# 5 मम विद्यालयः



**राजीवः :** पश्य, अनिल! एषः मम विद्यालयः।

मम विद्यालयः सुन्दरः अस्ति।

**अनिलः :** सत्यम्। विद्यालयः विशालः अपि अस्ति।

**राजीवः :** अहं प्रतिदिनं विद्यालयम् आगच्छामि।

**अनिलः :** विद्यालयस्य आरम्भः कदा भवति ?

**राजीवः :** मम विद्यालयस्य आरम्भः एकादशवादने भवति।

आरम्भे अहं प्रार्थनाखण्डं गच्छामि। तत्र अहं प्रार्थनां करोमि।

**अनिलः :** भवतः वर्गखण्डः कुत्र अस्ति ?

**राजीवः :** मम वर्गखण्डः प्रार्थनाखण्डस्य समीपे एव अस्ति।

**अनिलः :** भवतः वर्गशिक्षकः कः अस्ति?

**राजीवः :** हर्षामहोदया मम वर्गशिक्षिका अस्ति। सा संस्कृतं पाठयति।

**अनिलः :** भवतः विद्यालये पुस्तकालयः अस्ति वा ?

**राजीवः :** आम्। अहं पुस्तकालये पुस्तकं पठामि। मम विद्यालये विशालं क्रीडाङ्गणम् अपि अस्ति। विरामसमये अहं तत्र खेलामि।

**अनिलः :** अहो! भवतः विद्यालये रमणीयम् उद्यानम् अपि अस्ति।

**राजीवः :** न केवलम् उद्यानम्। उद्याने औषधबागः अपि अस्ति।

**अनिलः :** भवतः रोपितः वृक्षः अपि अस्ति वा ?

**राजीवः :** आम्। पश्य एषः वृक्षः मया रोपितः अस्ति।

**अनिलः :** उत्तमम्। तर्हि भवान् गृहं कदा गच्छति?

**राजीवः :** अहं सायं पञ्चवादने गृहं गच्छामि।

**अनिलः :** भवतः विद्यालयः ननु सुन्दरः अस्ति।

## टिप्पणी

**पश्य** જો **एषः** આ **अस्ति** છે **आरम्भः** શરૂઆત **आगच्छामि** આવું છું **कदा** ક્યારે **मम** મારું **गच्छामि** જાઉં છું. **कुत्र** ક્યાં **क्रीडाङ्गणम्** રમતનું મેદાન **एव** જ **ननु** ખરેખર **अहो** અરે, (આશ્ચર્ય દર્શાવવા) **भवति** થાય છે **तर्हि** તો (તો પછી) **रोपितः** વાવેલું, રોપેલું **पाठयति** ભણાવે છે

## स्वाध्यायः

1. નીચેના શબ્દોનું મોટેથી શુદ્ધ ઉચ્ચારણ કરો :

विद्यालयः, प्रतिदिनम्, आगच्छामि, आरम्भः, प्रार्थनाखण्डः, वर्गखण्डः, क्रीडाङ्गणम्, उद्यानम्, उत्तमम्।

**2. એકમના આધારે, નીચે આપેલાં વાક્યો સુધારીને ફરીથી લખો :**

(1) अनिलस्य विद्यालयः सुन्दरम् अस्ति। ______________________

(2) विद्यालये क्रीडाङ्गणः अस्ति। ______________________

(3) राजीवः पुस्तकालये क्रीडति। ______________________

(4) क्रीडाङ्गणे राजीवः पठति। ______________________

(5) राजीवः नववादने विद्यालयं गच्छति। ______________________

**3. નીચેનાં વાક્યોનો સંસ્કૃતમાં અનુવાદ કરો :**

(1) આ મારી શાળા છે. ______________________

(2) મારી શાળા સુંદર છે. ______________________

(3) શાળા અગિયાર વાગે શરૂ થાય છે. ______________________

(4) શાળામાં પુસ્તકાલય છે. ______________________

(5) હું રિસેશમાં મેદાનમાં રમું છું. ______________________

**4. કૌંસમાં આપેલા શબ્દોમાંથી યોગ્ય શબ્દ પસંદ કરી ખાલી જગ્યા પૂરો :**

(1) राजीवः ______________ वादने गृहं गच्छति (एकादश, पञ्च)

(2) मम विद्यालयः ______________ अस्ति। (सुन्दरः, लघुः)

(3) अहं प्रतिदिनं ______________ गच्छामि। (विमानयानम्, विद्यालयम्)

(4) राजीवः ______________ पुस्तकं पठति। (क्रीडाङ्गणे, पुस्तकालये)

**પ્રવૃત્તિ :**

- તમારી શાળાનું રેખાચિત્ર બનાવી તેના વિશે સંસ્કૃતમાં પાંચથી છ વાક્યો લખો.
- તમારા ગામ/શહેરનો નકશો બનાવો.
- બગીચો કે સારી વાડીની મુલાકાત લઈ ઔષધીય વૃક્ષોની માહિતી મેળવો.

**પ્રવૃત્તિ :**




- ઉપરનું ચિત્ર જોઈને નીચેની ખાલી જગ્યા પૂરો :

(1) मन्दिरस्य उत्तरे ________________ अस्ति।

(2) मन्दिरस्य पश्चिमे ________________ अस्ति।

(3) मन्दिरस्य पूर्वे ________________ अस्ति।

(4) मन्दिरस्य दक्षिणे ________________ अस्ति।

